শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩১

*বলিৱিধ্ৱংসনম্*

প্রীত্যা দৈত্যস্তৱ তনুমহঃ প্রেক্ষণাত্ সর্ৱথাপি
ত্বামারাধ্যন্নজিত রচযন্নঞ্জলিং সঞ্জগাদ।
মত্তঃ কিং তে সমভিলষিতং ৱিপ্রসূনো ৱদ ত্বং
ৱ্যক্তং ভক্তং ভৱনমৱনীং ৱাপি সর্ৱং প্রদাস্যে॥ ১ ॥

তামক্ষীণাং বলিগিরমুপাকর্ণ্য কারুণ্যপূর্ণো-
প্যস্যোতসেকং শমযিতুমনা দৈত্যৱংশং প্রশংসন্।
ভূমিং পাদত্রযপরিমিতাং প্রার্থযামাসিথ ত্বং
সর্ৱং দেহীতি তু নিগদিতে কস্য হাস্যং ন ৱা স্যাত্॥ ২ ॥

ৱিশ্বেশং মাং ত্রিপদমিহ কিং যাচসে বালিশস্তৱং
সর্ৱাং ভূমিং ৱৃণু কিমমুনেত্যালপত্ত্বাং স দৃপ্যন্।
যস্মাদ্দর্পাত্ ত্রিপদপরিপূর্ত্যক্ষমঃ ক্ষেপৱাদান
বন্ধং চাসাৱগমদতদর্হোপি গাঢোপশান্ত্যৈ॥ ৩ ॥

পাদত্রয্যা যদি ন মুদিতো ৱিষ্টপৈর্নাপি তুষ্যে-
দিত্যুক্তেস্মিন্ ৱরদ ভৱতে দাতুকামেথ তোযম্।
দৈত্যাচার্যস্তৱ খলু পরীক্ষার্থিনঃ প্রেরণাত্তং
মা মা দেযং হরিরযমিতি ৱ্যক্তমেৱাবভাষে॥ ৪ ॥

যাচত্যেৱং যদি স ভগৱান্ পূর্ণকামোস্মি সোহং
দাস্যাম্যেৱ স্থিরমিতি ৱদন্ কাৱ্যশপ্তোপি দৈত্যঃ।
ৱিন্ধ্যাৱল্যা নিজদযিতযা দত্তপাদ্যায তুভ্যং
চিত্রং চিত্রং সকলমপি স প্রার্পযত্তোযপূর্ৱম্॥ ৫ ॥

নিসসন্দেহং দিতিকুলপতৌ ত্বয্যশেষার্পণং তদ-
ব্যাতন্বানে মুমুচুৰৃষযঃ সামরাঃ পুষ্পৱর্ষম্।
দিব্যং রূপং তৱ চ তদিদং পশ্যতাং ৱিশ্বভাজা-
মুচ্চৈরুচ্চৈরৱৃধদৱধীকৃত্য ৱিশ্বাণ্ডভাণ্ডম্॥ ৬ ॥

ত্বতপাদাগ্রং নিজপদগতং পুণ্ডরীকোদভৱোসৌ
কুণ্ডীতোযৈরসিচদপুনাদ্যজ্জলং ৱিশ্বলোকান্।
হর্ষোতকর্ষাত্ সুবহু ননৃতে খেচরৈরুতসৱেস্মিন
ভেরীং নিঘ্নন্ ভুৱনমচরজ্জাম্বৱান্ ভক্তিশালী॥ ৭ ॥

তাৱদ্দৈত্যাস্তৱনুমতিমৃতে ভর্তুরারব্ধযুদ্ধা
দেৱোপেতৈর্ভৱদনুচরৈসসঙগতা ভঙগমাপন্।
কালাত্মাযং ৱসতি পুরতো যদৱশাত্ প্রাগজিতাঃ স্মঃ
কিং ৱো যুদ্ধৈরিতি বলিগিরা তেথ পাতালমাপুঃ॥ ৮ ॥

পাশৈর্বদ্ধং পতগপতিনা দৈত্যমুচ্চৈরৱাদী-
স্তার্তীযীকং দিশ মম পদং কিং ন ৱিশ্বেশ্বরোসি।
পাদং মূর্ধ্নি প্রণয ভগৱন্নিত্যকম্পং ৱদন্তং
প্রহ্লাদস্তং স্বযমুপগতো মানযন্নস্তৱীত্বাম্॥ ৯ ॥

দর্পোচ্ছিত্ত্যৈ ৱিহিতমখিলং দৈত্য সিদ্ধোসি পুণ্যৈ-
র্লোকস্তেস্তু ত্রিদিৱৱিজযী ৱাসৱত্বং চ পশ্চাত্।
মতসাযুজ্যং ভজ চ পুনরিত্যন্বগৃহ্ণা বলিং তং
ৱিপ্রৈসসন্তানিতমখৱরঃ পাহি ৱাতালযেশ॥ ১০ ॥

**********



www.prapatti.com